# shrIlakShmInArAyaNakavacham

# શ્રીલક્ષ્મીનારાયણકવચમ્

## Document Information

Text title : lakShmInArAyaNakavacham

File name : lakShmInArAyaNakavacham.itx

Category : kavacha, devii, lakShmI, narayana, devI, vishhnu, vishnu

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rudrayAmale devIrahasye

Latest update : June, 17, 2006

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનારાયણકવચમ્

શ્રીગણેશાય નમઃ ।
શ્રીભૈરવ ઉવાચ ।
અધુના દેવિ વક્ષ્યામિ લક્ષ્મીનારાયણસ્ય તે ।
કવચં મન્ત્રગર્ભં ચ વજ્રપઞ્જરકાખ્યયા ॥ ૧॥

શ્રીવજ્રપઞ્જરં નામ કવચં પરમાદ્ભુતમ્ ।
રહસ્યં સર્વદેવાનાં સાધકાનાં વિશેષતઃ ॥ ૨॥

યં ધૃત્વા ભગવાન્ દેવઃ પ્રસીદતિ પરઃ પુમાન્ ।
યસ્ય ધારણમાત્રેણ બ્રહ્મા લોકપિતામહઃ ॥ ૩॥

ઈશ્વરોઽહં શિવો ભીમો વાસવોઽપિ દિવસ્પતિઃ ।
સૂર્યસ્તેજોનિધિર્દેવિ ચન્દ્રર્માસ્તારકેશ્વરઃ ॥ ૪॥

વાયુશ્ચ બલવાંલ્લોકે વરુણો યાદસામ્પતિઃ ।
કુબેરોઽપિ ધનાધ્યક્ષો ધર્મરાજો યમઃ સ્મૃતઃ ॥ ૫॥

યં ધૃત્વા સહસા વિષ્ણુઃ સંહરિષ્યતિ દાનવાન્ ।
જઘાન રાવણાદીંશ્ચ કિં વક્ષ્યેઽહમતઃ પરમ્ ॥ ૬॥

કવચસ્યાસ્ય સુભગે કથિતોઽયં મુનિઃ શિવઃ ।
ત્રિષ્ટુપ્ છન્દો દેવતા ચ લક્ષ્મીનારાયણો મતઃ ॥ ૭॥

રમા બીજં પરા શક્તિસ્તારં કીલકમીશ્વરિ ।
ભોગાપવર્ગસિદ્ધ્યર્થં વિનિયોગ ઇતિ સ્મૃતઃ ॥ ૮॥

ૐ અસ્ય શ્રીલક્ષ્મીનારાયણકવચસ્ય શિવઃ ઋષિઃ ,
ત્રિષ્ટુપ્ છન્દઃ , શ્રીલક્ષ્મીનારાયણ દેવતા ,
શ્રીં બીજં , હ્રીં શક્તિઃ , ૐ કીલકં ,
ભોગાપવર્ગસિદ્ધ્યર્થે પાઠે વિનિયોગઃ ।
અથ ધ્યાનમ્ ।

પૂર્ણેન્દુવદનં પીતવસનં કમલાસનમ્ ।
લક્ષ્મ્યા શ્રિતં ચતુર્બાહું લક્ષ્મીનારાયણં ભજે ॥ ૯॥

અથ કવચમ્ ।
ૐ વાસુદેવોઽવતુ મે મસ્તકં સશિરોરુહમ્ ।
હ્રીં લલાટં સદા પાતુ લક્ષ્મીવિષ્ણુઃ સમન્તતઃ ॥ ૧૦॥

હ્સૌઃ નેત્રેઽવતાલ્લક્ષ્મીગોવિન્દો જગતાં પતિઃ ।
હ્રીં નાસાં સર્વદા પાતુ લક્ષ્મીદામોદરઃ પ્રભુઃ ॥ ૧૧॥

શ્રીં મુખં સતતં પાતુ દેવો લક્ષ્મીત્રિવિક્રમઃ ।
લક્ષ્મી કણ્ઠં સદા પાતુ દેવો લક્ષ્મીજનાર્દનઃ ॥ ૧૨॥

નારાયણાય બાહૂ મે પાતુ લક્ષ્મીગદાગ્રજઃ ।
નમઃ પાર્શ્વૌ સદા પાતુ લક્ષ્મીનન્દૈકનન્દનઃ ॥ ૧૩॥

અં આં ઇં ઈં પાતુ વક્ષો ૐ લક્ષ્મીત્રિપુરેશ્વરઃ ।
ઉં ઊં ઋં ૠં પાતુ કુક્ષિં હ્રીં લક્ષ્મીગરુડધ્વજઃ ॥ ૧૪॥

લૃં લૄં એં ઐં પાતુ પૃષ્ઠં હ્સૌઃ લક્ષ્મીનૃસિંહકઃ ।
ઓં ઔં અં અઃ પાતુ નાભિં હ્રીં લક્ષ્મીવિષ્ટરશ્રવઃ ॥ ૧૫॥

કં ખં ગં ઘં ગુદં પાતુ શ્રીં લક્ષ્મીકૈટભાન્તકઃ ।
ચં છં જં ઝં પાતુ શિશ્નં લક્ષ્મી લક્ષ્મીશ્વરઃ પ્રભુઃ ॥ ૧૬॥

ટં ઠં ડં ઢં કટિં પાતુ નારાયણાય નાયકઃ ।
તં થં દં ધં પાતુ ચોરૂ નમો લક્ષ્મીજગત્પતિઃ ॥ ૧૭॥

પં ફં બં ભં પાતુ જાનૂ ૐ હ્રીં લક્ષ્મીચતુર્ભુજઃ ।
યં રં લં વં પાતુ જઙ્ઘે હ્સૌઃ લક્ષ્મીગદાધરઃ ॥ ૧૮॥

શં ષં સં હં પાતુ ગુલ્ફૌ હ્રીં શ્રીં લક્ષ્મીરથાઙ્ગભૃત્ ।
ળં ક્ષઃ પાદૌ સદા પાતુ મૂલં લક્ષ્મીસહસ્રપાત્ ॥ ૧૯॥

ઙં ઞં ણં નં મં મે પાતુ લક્ષ્મીશઃ સકલં વપુઃ ।
ઇન્દ્રો માં પૂર્વતઃ પાતુ વહ્નિર્વહ્નૌ સદાવતુ ॥ ૨૦॥

યમો માં દક્ષિણે પાતુ નૈરૃત્યાં નિરૃતિશ્ચ મામ્ ।
વરુણઃ પશ્ચિમેઽવ્યાન્માં વાયવ્યેઽવતુ માં મરુત્ ॥ ૨૧॥

ઉત્તરે ધનદઃ પાયાદૈશાન્યામીશ્વરોઽવતુ ।

વજ્રશક્તિદણ્ડખડ્ગ પાશયષ્ટિધ્વજાઙ્કિતાઃ ॥ ૨૨॥

સશૂલાઃ સર્વદા પાન્તુ દિગીશાઃ પરમાર્થદાઃ ।
અનન્તઃ પાત્વધો નિત્યમૂર્ધ્વે બ્રહ્માવતાચ્ચ મામ્ ॥ ૨૩॥

દશદિક્ષુ સદા પાતુ લક્ષ્મીનારાયણઃ પ્રભુઃ ।
પ્રભાતે પાતુ માં વિષ્ણુર્મધ્યાહ્ને વાસુદેવકઃ ॥ ૨૪॥

દામોદરોઽવતાત્ સાયં નિશાદૌ નરસિંહકઃ ।
સઙ્કર્ષણોઽર્ધરાત્રેઽવ્યાત્ પ્રભાતેઽવ્યાત્ ત્રિવિક્રમઃ ॥ ૨૫॥

અનિરુદ્ધઃ સર્વકાલં વિશ્વક્સેનશ્ચ સર્વતઃ ।
રણે રાજકુલે દ્યુતે વિવાદે શત્રુસઙ્કટે
ૐ હ્રીં હ્સૌઃ હ્રીં શ્રીં મૂલં લક્ષ્મીનારાયણોઽવતુ ॥ ૨૬॥

ૐૐૐરણરાજચૌરરિપુતઃ પાયાચ્ચ માં કેશવઃ
હ્રીંહ્રીંહ્રીંહહ્હાહ્સૌઃ હ્સહ્સૌઃ વહ્નેર્વતાન્માધવઃ ।
હ્રીંહ્રીંહ્રીંજલપર્વતાગ્નિભયતઃ પાયાદનન્તો વિભુઃ
શ્રીંશ્રીંશ્રીંશશશાલલં પ્રતિદિનં લક્ષ્મીધવઃ પાતુ મામ્ ॥ ૨૭॥

ઇતીદં કવચં દિવ્યં વજ્રપઞ્જરકાભિધમ્ ।
લક્ષ્મીનારાયણસ્યેષ્ટં ચતુર્વર્ગફલપ્રદમ્ ॥ ૨૮॥

સર્વસૌભાગ્યનિલયં સર્વસારસ્વતપ્રદમ્ ।
લક્ષ્મીસંવનનં તત્ત્વં પરમાર્થરસાયનમ્ ॥ ૨૯॥

મન્ત્રગર્ભં જગત્સારં રહસ્યં ત્રિદિવૌકસામ્ ।
દશવારં પઠેદ્રાત્રૌ રતાન્તે વૈષ્ણવોત્તમઃ ॥ ૩૦॥

સ્વપ્ને વરપ્રદં પશ્યેલ્લક્ષ્મીનારાયણં સુધીઃ ।
ત્રિસન્ધ્યં યઃ પઠેન્નિત્યં કવચં મન્મુખોદિતમ્ ॥ ૩૧॥

સ યાતિ પરમં ધામ વૈષ્ણવં વૈષ્ણવેશ્વરઃ ।
મહાચીનપદસ્થોઽપિ યઃ પઠેદાત્મચિન્તકઃ ॥ ૩૨॥

આનન્દપૂરિતસ્તૂર્ણં લભેદ્ મોક્ષં સ સાધકઃ ।
ગન્ધાષ્ટકેન વિલિખેદ્રવૌ ભૂર્જે જપન્મનુમ્ ॥ ૩૩॥

પીતસૂત્રેણ સંવેષ્ટ્ય સૌવર્ણેનાથ વેષ્ટયેત્ ।
ધારયેદ્ગુટિકાં મૂર્ધ્નિ લક્ષ્મીનારાયણં સ્મરન્ ॥ ૩૪॥

રણે રિપુન્ વિજિત્યાશુ કલ્યાણી ગૃહમાવિશેત્ ।
વન્ધ્યા વા કાકવન્ધ્યા વા મૃતવત્સા ચ યાઙ્ગના ॥ ૩૫॥

સા બધ્નીયાન્ કણ્ઠદેશે લભેત્ પુત્રાંશ્ચિરાયુષઃ ।
ગુરુપદેશતો ધૃત્વા ગુરું ધ્યાત્વા મનું જપન્ ॥ ૩૬॥

વર્ણલક્ષપુરશ્ચર્યા ફલમાપ્નોતિ સાધકઃ ।
બહુનોક્તેન કિં દેવિ કવચસ્યાસ્ય પાર્વતિ ॥ ૩૭॥

વિનાનેન ન સિદ્ધિઃ સ્યાન્મન્ત્રસ્યાસ્ય મહેશ્વરિ ।
સર્વાગમરહસ્યાઢ્યં તત્ત્વાત્ તત્ત્વં પરાત્ પરમ્ ॥ ૩૮॥

અભક્તાય ન દાતવ્યં કુચૈલાય દુરાત્મને ।
દીક્ષિતાય કુલીનાય સ્વશિષ્યાય મહાત્મને ॥ ૩૯॥

મહાચીનપદસ્થાય દાતવ્યં કવચોત્તમમ્ ।
ગુહ્યં ગોપ્યં મહાદેવિ લક્ષ્મીનારાયણપ્રિયમ્ ।
વજ્રપઞ્જરકં વર્મ ગોપનીયં સ્વયોનિવત્ ॥ ૪૦॥

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે શ્રીદેવીરહસ્યે
લક્ષ્મીનારાયણકવચં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrIlakShmInArAyaNakavacham*
pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*